"निर्व्वेदावेगदैन्यश्रममदजड़ता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्व्वा मरणमलसतामर्षनिद्रावहित्थाः ।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलताग्लानिचिन्ता वितर्काः ॥"

एतेषां लक्षणादिकं तत्तच्छब्दे विशेषतो द्रष्टव्यम् ।) त्रि, व्यभिचारविशिष्टः । (स्वमार्गच्युतः । यथा, कथासरित्सागरे । १५ । ५५ ।

"तथापि मन्त्रितात्यातिरस्माकं यान्यथा भवेत् ।
स्वामिसंभावनायाश्च भवेम व्यभिचारिणः ॥"

अनित्यः । आगमापायी । यथा, भागवते । ११ । ३ । ३८ ।

"नात्मा जजान न मरिष्यति नैधतेऽसौ
न क्षीयते सवनविद्व्यभिचारिणां हि ।")

व्यय, क वदि । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) अन्तःस्थादियुक्तः । क, व्याययति । वदि प्रेरणे । इति दुर्गादासः ॥

व्यय, ञ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ञ, व्ययति व्ययते । इति दुर्गादासः ॥

व्यय, त् क गतौ । त्यागे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) व्यययति । इति दुर्गादासः ॥

व्ययं, क्ली, (व्यय गतौ + अच् ।) लग्नात् द्वादशस्थानम् । यथा,—

"जन्म धनं भ्रातृबन्धुपुत्त्रशत्रुकलत्रकाः ।
मरणं धर्म्मकर्म्मायव्यया द्वादशराशयः ॥"
इति ज्योतिस्तत्त्वम् ॥

(व्ययति गच्छतीति । व्यय गतौ + अच् । नश्वरे, त्रि । यथा, मनुः । १ । १९ ।

"सूक्ष्माभ्यो मूर्त्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम् ॥")

व्ययः, पुं, (वि + इ + अच् ।) अर्थस्यापगमः । वित्तसमुत्सर्गः । इति शब्दरत्नावली ॥ खरच् इति पारस्यभाषा ॥ (यथा, मनुः । ९ । ११ ।

"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ॥"

नाशः । यथा, भागवते । ४ । १ । ४९ ।

"ताविमौ वै भगवतो हरेरंशाविहागतौ ।
भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥"

परित्यागः । दानम् । यथा, रघुः । १२ । २३ ।

"आत्मानं सुसुचे तस्मात् एकनेत्रव्ययेन सः ॥"

वृहस्पतिचारगतवर्षविशेषः । यथा, वृहत्संहितायाम् । ८ । ३६ ।

"यच्चमं व्ययमुशन्ति शोभनं
मन्मथप्रबलमत्तवाक्कुलम् ॥"

नागविशेषः । यथा, महाभारते । १।५७।१६।

"अमाहठः कामठकः सुषेणो मानसो व्ययः ॥")

व्ययितः, त्रि, (व्यय + क्तः ।) कृतव्ययः । व्यय-शब्दादितप्रत्ययेन व्ययधातोः क्तप्रत्ययेन वा निष्पन्नम् ॥

व्ययी, [न्] त्रि, (व्ययोऽस्यास्तीति । व्यय + इनिः ।) व्यययुक्तः । यथा,—

"द्रविणं परिमितमधिकव्ययिनं जनमाकुलीकुरुते ।
क्षीणाञ्चलमिव पीनस्तनजघनायाः कुलीनायाः ॥"
इत्युद्भटः ॥

व्यर्थं, त्रि, (विगतोऽर्थो यस्मात् ।) निरर्थकम् । तत्पर्य्यायः । मोघम् २ विफलम् ३ । इति जटाधरः ॥ (यथा, कुमारे । ३ । ७५ ।

"शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ॥")

व्यलीकं, क्ली, (विशेषेण अलतीति । वि + अल + "अलीकादयश्च ।" उणा० ४ । २५ । इति कीकन्प्रत्ययेन निपातनात् साधुः ।) पीड़ार्थः । इत्यमरः ॥ गतिविपर्य्ययः । कामजापराधः । इति तट्टीकायां भरतः ॥ यथा,—

"सत्यं नैव विजानाति परेणापकृतं क्वचित् ।
कृतञ्च संस्मरेद्दैतदसत्यञ्च न जल्पति ।
व्यलीकेषु निवृत्तो यः पर्य्येति कृतनिश्चयः ।
मितञ्च धृतिमान् किञ्चित् परोक्षेऽपि न च क्षिपेत् ॥
ऋतुकालेऽभिगच्छेत अपत्यार्थं स्वकां स्त्रियम् ।
ईदृशास्तु नरा भद्रे मम कर्म्मपरायणाः ॥"
इति वाराहे योनिगर्भमोचननामाध्यायः ॥

अप्रियम् । (यथा, महाभारते । ३ । ६ । ९ ।

"न हि तेन मम भ्रात्रा सुसूक्ष्ममपि किञ्चन ।
व्यलीकं कृतपूर्व्वं वै प्राज्ञेनामितबुद्धिना ॥")

अकार्य्यम् । वैलक्ष्यम् । इति मेदिनी ॥ (यथा, किराते । ३ । १९ ।

"यस्मिन्ननैश्वर्य्यकृतव्यलीकः
पराभवं प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्य्यात्
मनो भयैकप्रवणं स भीष्मः ॥")

अपराधः । इति हेमचन्द्रः ॥ (यथा, शिशुपालवधे । ९ । ८५ ।

"सुदृशः सरसव्यलीकतप्तस्तरसा श्लिष्यतः सयौवनोष्मा ॥")

प्रतारणा । इति हलायुधः ॥ (दुःखम् । इति वैजयन्ती ॥ यथा, कुमारे । ३ । २५ ।

"दिग् दक्षिणा गन्धवहं मुखेन
व्यलीकनिश्वासमिवोत्ससर्ज्ज ॥")

तद्वति, त्रि ॥ (यथा, भागवते । ८ । २२ । २ ।

"यद्युत्तमःश्लोक भवान् ममेरितं
वचो व्यलीकं सुरवर्य्य मन्यते ।
करोम्यृतं तन्न भवेत् प्रलम्भनं
पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥")

व्यलीकः, पुं, (वि + अल पर्य्याप्तौ + कीकन् ।) नागरः । इति मेदिनी ॥ तत्पर्य्यायः । विदूगः २ षट्प्रज्ञः ३ कामकेलिः ४ विदूषकः ५ पीठकेलिः ६ पीठमर्द्दः ७ भङ्गिलः ८ छिदुरः ९ विटः १० । इति त्रिकाण्डशेषः ॥

व्यवकलनं, क्ली, (वि + अव + कल + ल्युट् ।) वियोगः । हीनः । अङ्कस्यान्तरकरणम् । बाकिकाटा इति भाषा । यथा,—

"अये बाले लीलावति ! मतिमति ! ब्रूहि सहितान्
द्विपञ्चद्वात्रिंशत्त्रिनवतिशताष्टादशदश ।
शतोपेतानेतानयुतवियुतांश्चापि वद मे
यदि व्यक्तेर्युक्तिव्यवकलनमार्गेऽसि कुशला ॥"
इति लीलावती ॥

व्यवकलितः, त्रि, (वि + अव + कल + क्तः ।) कृतव्यवकलनः । वियोगितः । हीनितः । व्यवकलने, क्ली । यथा । अथ सङ्कलितव्यवकलितयोः करणसूत्रं वृत्तार्द्धम् ।

"कार्य्यं क्रमादुत्क्रमतोऽथवाङ्कयोगो यथास्थानकमन्तरं वा ॥"
इति लीलावती ॥

व्यवच्छिन्नं, त्रि, (वि + अव + छिद् + क्तः ।) भिन्नम् । यथा । भिन्नन्तु व्यवच्छिन्नं विशेषितम् । इति त्रिकाण्डशेषः ॥

व्यवच्छेदः, पुं, (वि + अव + छिद् + घञ् ।) बाणमुक्तिः । इति हेमचन्द्रः ॥ पृथक्त्वञ्च । (विरामः । निवृत्तिः । यथा, भागवते । ४ । २९ । ३२ ।

"जीवस्य न व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रिया ॥")

व्यवधा, स्त्री, (वि + अव + धा + "आतश्चोपसर्गे । इत्यङ । टाप् ।) व्यवधानम् । इत्यमरः ॥

व्यवधानं, क्ली, (वि + अव + धा + ल्युट् ।) आच्छादनम् । तत्पर्य्यायः । तिरोधानम् २ अन्तर्द्धिः ३ अपवारणम् ४ छदनम् ५ व्यवधा ६ अन्तर्द्धा ७ पिधानम् ८ स्थगनम् ९ । इति हेमचन्द्रः ॥ व्यवधिः १० अपिधानम् ११ । इति शब्दरत्नावली ॥ (यथा, रघुः । १३ । ४४ ।

"दृष्टं विमानव्यवधानमुक्तां
पुनः सहस्रार्च्चिषि सन्निधत्ते ॥")

भेदः । यथा, भागवते । ४ । २२ । २७ ।

"परात्मनोर्यद्व्यवधानकं पुरस्तात्
स्वप्ने यथा पुरुषस्तद्विनाशे ॥"

विच्छेदः । यथा, शिशुपालवधे । ९ । ५१ ।

"वपुरन्वलिप्त परिरम्भसुखव्यवधानभीरुकतया न वधूः ॥"

समाप्तिः । यथा, भागवते । ४ । २९ । ७७ ।

"यावदन्यं न विन्देत व्यवधानेन कर्म्मणाम् ॥")

व्यवधायकः, त्रि, (व्यवदधातीति । वि + अव + धा + ण्वुल् ।) व्यवधानकर्त्ता । यथा । स्वर्गकामो यजेत सप्तदशावरा ऋद्धिकामाः सत्रमुपासीरन्निति वेदे कामिनां कर्त्तृत्वावगतेस्तदनुपपत्त्या अविमृश्यापारान्तर्भावो न व्यवधायकः । इति प्रायश्चित्तविवेकः ॥

व्यवधिः, पुं, (वि + अव + धा + "उपसर्गे घोः किः ।" ३।३।९२। इति किः ।) व्यवधानम् । इति शब्दरत्नावली ॥ (यथा, नैषधचरिते ।२।१६।